अथ द्वादश यात्रा ।
"प्रणम्य जगतां नाथं कलिकल्मषनाशनम् ।
द्वादशयात्रातत्त्वानि वक्ति श्रीरघुनन्दनः ॥"
तत्रादौ द्वादशयात्राकालस्य सुखोपादेयत्वात् आदौ स एव निरूप्यते । तद्यथा स्कन्दपुराणे ।
इन्द्रद्युम्न उवाच ।
"वैशाखादिषु मासेषु यात्रापूजाविधिं मुने ! ।
श्रोतुमिच्छामि देवेशे यथावद्वक्तुमर्हसि ॥
जैमिनिरुवाच ।
वैशाखादिषु मासेषु देवदेवस्य शार्ङ्गिणः ।
या या द्वादश यात्राः स्युस्ता हि वक्ष्यामि ते नृप ॥
वैशाखे चन्दनी यात्रा ज्यैष्ठे स्नापन्युदीरिता ।
आषाढ़े रथयात्रा स्यात् श्रावणे शयनी तथा ।
भाद्रे दक्षिणपार्श्वीया आश्विने वामपार्श्विका ।
उत्थानी कार्त्तिके मासि छादनी मार्गशीर्षके ।
पौषे पुष्याभिषेकः स्यान्माघे शाल्योदनी तथा ।
फाल्गुने दोलयात्रा स्याच्चैत्रे मदनभञ्जिका ।
एकैका मुक्तिदा सर्व्वा धर्म्मकामार्थसाधनाः ॥"
अथ यात्राविधिः । स्कान्दे ।
"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभनैः ॥
वैशाखस्यामले पक्षे तृतीया पापनाशिनी ।
स्वयमाविष्कृता चैषा प्राजापत्यर्क्षसंयुता ॥
यः पश्यति तृतीयायां कृष्णं चन्दनभूषितम् ।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥
वैष्णवा जयशब्दैश्च पूजयित्वा तदा हरिम् ।
नानाशास्त्रोपनिषदैर्विविधैः संस्तुवन्ति च ॥
वेणुवीणादिवाद्यैश्च तथा नानोपचारकैः ।
मन्त्रोक्षयन् जगन्नाथं तृतीयादौ विलेपयेत् ॥
वैशाखस्य तृतीयायां जलमध्ये विधानतः ।
लेपनं मण्डपे कुर्य्यान्मञ्चके वा ह्रदाङ्गने ॥
चन्दनागुरुह्रीवेरं कुङ्कुमरोचनाः ।
जटामांसी मुरा चैव विष्णोर्गन्धाष्टकं विदुः ॥
एतैर्गन्धैस्तथान्यैश्च विष्णोर्गात्राणि लेपयेत् ।
एतच्च तुलसीकाष्ठं कुर्य्याल्लेपनकर्म्मणि ॥" १ ।
अथ स्नानयात्रा । स्कन्दपुराणे ।
"ज्यैष्ठ्यामथावतीर्णत्वात् पूज्यं जन्मवासरम् ।
तस्याञ्च स्नापनं कार्य्यं महास्नानविधानतः ।
तस्यां प्रातःस्नानकाले अग्रजं सहितञ्च माम् ।
रामं सुभद्रां स्नाप्य मम लोकमवाप्नुयात् ॥"
तथा ।
"मासि ज्यैष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते ।
पौर्णमास्यां हरेः स्नानं सर्व्वकामफलप्रदम् ॥
सर्व्वतीर्थमयः कूपस्तदास्ते निर्म्मलः शुचिः ।
तदा भोगवती तत्र प्रत्यक्षं भवति द्विजाः ॥
तस्मात् ज्यैष्ठ्यां समुद्धृत्य हेमाद्यैः कलसैर्घटैः ।
स्नापयन्ति तदा कृष्णं सततं तं हलायुधम् ।
जन्माहनि हरेः स्नानमुत्सवं परमाद्भुतम् ।
उत्सवो वै न हीयेत तस्मात्तद्यत्नतश्चरेत् ॥
जन्मनो जयकारित्वाज्जन्मयात्रा प्रतिष्ठिता ।
ज्यैष्ठस्नानं भगवतो ये पश्यन्ति मुदान्विताः ॥
न ते भवाब्धौ मज्जन्ति यात्रायां यतमानसाः ।
ज्यैष्ठे च स्नपनं कुर्य्यात् श्रीविष्णोर्जन्मवासरे ॥
दैनन्दिनन्तु दुरितं पक्षमासर्त्तुवर्षजम् ।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ॥
स्वर्णस्तेयसुरापानगुरुतल्पयुतानि च ।
कोटिकोटिसहस्राणि क्षुद्रपापानि यानि च ॥
सर्व्वाण्येव प्रणश्यन्ति पौर्णमास्यान्तु वासरे ।
पुरुषसूक्तमन्त्रेण पावमान्या तथैव च ॥
नारिकेलोदकेनाथ तथा तालफलाम्बुना ।
पञ्चामृतैः शीततोयैर्दूर्व्वाकर्पूरवासितैः ॥
यवोदकेन शुद्धेन तथा पुष्पोदकेन च ।
स्नापयित्वा जगन्नाथं पूजयेत् परमेश्वरम् ॥
ॐ घं घण्टायै नमः इति घण्टावाद्यं निवेदयेत् ।
य एवं कुरुते विद्वान् ब्राह्मणः क्षत्रियः शुचिः ।
सर्व्वपापैः प्रमुच्येत विष्णुलोकं स गच्छति ।
चतुर्द्दश्यां दृढ़ं मञ्चं कारयित्वा सुशोभनम् ॥
सुगन्धिधूपसुरभिं चन्द्रातपसमुच्छ्रितम् ।
एवं मञ्चं प्रतिष्ठाप्य कलशानधिवासयेत् ॥
सुवासितं जलपूर्णं पावकं कलसं न्यसेत् ।
जयशब्दैश्च स्तुतिभिर्नीयते जगदीश्वरः ॥
जयस्व राम कृष्णेति जयभद्रेति चोदिते ।
नीयते मञ्चदेशन्तु निशीथे ब्राह्मणादिभिः ॥"
अथ रथयात्रा । स्कन्दपुराणे ।
"गुण्डिचाख्यां महायात्रां प्रकुर्व्वीथाः क्षितीश्वर ! ।
आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ॥
तस्यां रथे समारोप्य रामं मां भद्रया सह ।
यात्रोत्सवं प्रवर्त्त्याथ प्रीणयेच्च द्विजान् बहून् ॥
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ।
सम्प्राप्ते सरितस्तीरे मम यात्रा भविष्यति ॥
अष्टमे दिवसे सर्व्वान् रथान् माल्यैर्विभूषयेत् ।
नवम्यामानयेद्देवांस्तेषु प्रीतः सद्द्विजान् ॥
दक्षिणाभिमुखी यात्रा विष्णोरेषा सुदुर्लभा ।
यथा पूर्व्वा तथा चेयं ते द्वे मुक्तिप्रदायिके ॥
अष्टाहे विजयेच्छन्नं तदर्द्धेन तु पार्व्वतीम् ॥"
इतिवत् तिथिना एकाहो बोद्धव्यः ।
"तिथिनैकेन दिवसश्चान्द्रमानेन कीर्त्तितः ॥"
इति विष्णुधर्म्मोत्तरात् ।
यत्तु ।
"आषाढ़स्य सिते पक्षे भद्रा या पुष्यसंयुता ।
यात्रोत्सवं प्रकुर्व्वीयात्तदभावे पुष्य एव हि ॥"
इति ईश्वरसंहितायां वचनान्तरम् ।
तद्वैकल्पिकप्रयोगान्तरविधायकम् । पाद्मे ।
"आषाढ़स्य द्वितीयायां रथं कुर्य्याद्विशेषतः ।
आषाढ़शुक्लैकादश्यां जपहोममहोत्सवम् ॥
नातः परं हि कृष्णस्य यात्रान्तरमपेक्षते ।
अथ स्वयं त्रिलोकेशः स्यन्दनेन कुतूहलात् ॥
नाशयन् सर्व्वपापानि वर्षे वर्षे व्रजेदसौ ।
रथस्थितं व्रजन्तं तं महावेदीमहोत्सवे ॥
ये पश्यन्ति मुदा भक्त्या वासस्तेषां हरेः पदे ।
सत्यं सत्यं पुनः सत्यं प्रतिज्ञातं द्विजोत्तमाः ॥
नातः श्रेयःपदो विष्णोरुत्सवः शास्त्रसम्मतः ।
रथयात्रैव यात्राणां मुख्येत्याह प्रजापतिः ॥
महावेदीं व्रजन्तं तं रथस्थं पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च दृष्ट्वा मुक्तिर्न चान्यथा ॥
आषाढ़स्य सिते पक्षे दिने विष्णोः शुभप्रदे ।
प्रतिष्ठाप्य समन्त्रेण विधिना पूर्व्ववद्द्विजाः ॥
रथं नरो हरेः कुर्य्यात् स्वासनं सुपरिष्कृतम् ।
भूषयेद्विविधैर्भक्त्या वस्त्रालङ्कारमाल्यकैः ॥
मृदङ्गपणवाद्यैश्च भेरीढक्कादयस्तथा ।
नटनर्त्तकमुख्याश्च गायना बहवस्तथा ॥
वेश्या यौवनदर्पाढ्या रूपालङ्कारभूषिताः ।
ध्वजाश्च बहवस्तत्र पताकाधिष्ठिताम्बराः ॥
गरुड़स्य ध्वजं कुर्य्यात् रक्तचन्दनमिश्रितम् ।
दीर्घनासं पीतदेहं कुण्डलाभ्यां विभूषितम् ॥
चतुर्द्दष्ट्रभुजगं सर्व्वालङ्कारभूषितम् ।
देव्याः पद्मध्वजं कुर्य्यात् पद्मकाष्ठविनिर्म्मितम् ॥
सप्तच्छदमयं कुर्य्याच्छौरिणो लाङ्गलध्वजम् ।
सारथिं वाजिनश्चैव बलं बलसुदान्वितम् ॥
हीरकैर्म्मङ्गलैर्दामैस्तैर्व्विविधवर्णैः सुशोभनम् ।
इत्थं सुघटितं तन्तु रथं देवत्रयस्य च ॥
अरुणोदयवेलायां देवं तस्मात् प्रपूजयेत् ।
ब्राह्मणैर्व्वैष्णवैः सार्द्धं यतिभिश्च तपस्विभिः ॥
विज्ञापयेद्देवदेवं यात्रायै स कृताञ्जलिः ।
ततः कर्पूरपर्णैश्च सुमनोभिरवाकिरत् ॥
पथि शोभनसूक्तानि प्रपठन्ति द्विजातयः ।
केचिन्मङ्गलगाथाश्च केचिज्जय जयेति च ॥
जितन्त इति मन्त्रं वै केचित् पुण्ये जपन्ति च ।
सूतमागधमुख्याश्च कीर्त्तिं कार्ष्णीं मुदा जगुः ॥
चर्च्चरीझर्झरीवेणुवीणामाधुरिकादयः ।
शब्दायन्ते सुमधुरं गोविन्दविजयान्तरे ॥
एवं प्रवृत्ते समये कृष्णं रामपुरःसरम् ।
नयन्ति विप्रा भद्राश्च क्षत्रियाश्च विशस्तथा ॥
करे धृत्वा जगन्नाथं भ्रामयित्वा रथत्रयम् ।
रामं भद्राञ्च कृष्णञ्च रथमध्ये निवेशयेत् ॥
पूजयेदुपचारैस्तैः श्रद्धाभक्तिसुसंयतः ।
रथच्छायां समाक्रम्य ब्रह्महत्यां व्यपोहति ॥
तद्दिशं संस्कृतसुस्थनेऽपि पापसंहतिम् ।
घनाम्बुवृष्टिसिक्तेन स्वर्गङ्गास्नानजं फलम् ॥
ये प्रणामं प्रकुर्व्वन्ति तेऽपि मोक्षमवाप्नुयुः ।
अनुगच्छन्ति ये कृष्णं ते देवतुल्यविग्रहाः ॥
वेदैः स्तुवन्ति वेदानां वक्तारो मोक्षभागिनः ।
इतिहासपुराणाद्यैः स्तोत्रैर्व्वापि सुसंस्कृतैः ॥
स्तुवन्ति पुण्डरीकाक्षं ये वै विगतकल्मषाः ।
ते वै जयन्ति पापानि जयशब्दैः स्तुवन्ति ये ॥
नर्त्तनं कुरुते वापि गायन्त्यथ नरोत्तमाः ।
वैष्णवोत्तमसंसर्गान्मुक्तिं प्राप्नोत्यसंशयम् ॥
नामानि कीर्त्तयिष्यन्ति न ते यान्ति यमालयम् ।
जयस्व रामकृष्णेति जयभद्रेति यो वदेत् ॥
न मातृगर्भे वासोऽस्य स च देवत्वमाप्नुयात् ।
चामरैर्व्यजनैः पुष्पैः स्तवकैश्चीनचेलकैः ॥
रथस्याग्रे स्थितो यो वै वीजयेत् पुरुषोत्तमम् ।
संवीज्यमानोऽप्सरोभिर्द्देवगन्धर्व्वयोषितान् ॥
भुङ्क्ते तु भोगानखिलान् यावदाभूतसंप्लवम् ।